# ॥ श्री विश्वनाथ सुप्रभातं॥

उत्तिष्ट भैरवस्वामिन् काशिकापुरपालक ।
श्रीविश्वनाथभक्तानां संपूरय मनोरथम् ॥ १॥

स्नानाय गाङ्गसलिलेऽथ समर्चनाय विश्वेश्वरस्य बहुभक्तजना उपेताः ।
श्रीकालभैरव लसन्ति भवन्निदेशं उत्तिष्ट दर्शय दशां तव सुप्रभातम् ॥ २॥

यागव्रतादिबहुपुण्यवशं यथा त्वं पापात्मनामपि तथा सुगतिप्रदाऽसि ।
कारुण्यपूरमयि शैलसुतासपत्नि मातर्भगीरथसुते तव सुप्रभातम् ॥ ३॥

दुग्धप्रवाहकमनीयतरङ्गभङ्गे पुण्यप्रवाहपरिपाथितभक्तसङ्गे ।
नित्यं तपस्विजनसेवितपादपद्मे गङ्गे शरण्यशिवदे तव सुप्रभातम् ॥ ४॥

वाराणसीस्थितगजानन दुण्ठिराज संप्रार्थितेऽष्टफलदानसमर्थमूर्ते ।
उत्तिष्ट विघ्नविरहाय भजामहे त्वां श्रीपार्वतीतनय भोस्तव सुप्रभातम् ॥ ५॥

पूजास्पद प्रथममेव सुरेशु मध्ये संपूरणे कुशल भक्तमनोरथानाम् ।
गीर्वाणबृन्दपरिपूजितपादपद्म संजायतां गणपते तव सुप्रभातम् ॥ ६॥

कात्यायनी प्रमथनाथशरीरभागे भक्तालिगीतमुखरीकृतपादपद्मे ।
ब्रह्मादिदेवगणवन्दितदिव्यशौर्ये श्रीविश्वनाथदयिते तव सुप्रभातम् ॥ ७॥

प्रातः प्रसीद विमले कमलायताक्षि कारुण्यपूर्णहृदये नमतां शरण्ये ।
निर्धूतपापनिचये सुरपूजितांघ्रे श्रीविश्वनाथदयिते तव सुप्रभातम् ॥ ८॥

सस्यानुकूलजलवर्षणकार्यहेतोः शाकम्भरीति तव नाम भुवि प्रसिद्दम् ।
सस्यातिजातमिह शुष्यति चान्नपूर्णे उत्तिष्ट सर्वफलदे तव सुप्रभातम् ॥ ९॥

सर्वोत्तमं मानवजन्म लब्ध्वा हिनस्ति जीवान् भुवि मर्त्यवर्गः ।
तद्वारणायाशु जहीहि निद्रां देव्यन्नपूर्णे तव सुप्रभातम् ॥ १०॥

श्रीकण्ठ कण्ठधृतपन्नग नीलकण्ठ सोत्कण्ठभक्तनिवहोपहितोपकण्ठ ।

उत्तिष्ट सर्वजनमङ्गलसाधनाय विश्वप्रजाप्रथितभद्र जहीहि निद्राम् ॥११॥

गङ्गाधराद्रितनयाप्रिय शान्तमूर्ते वेदान्तवेद्य सकलेश्वर विश्वमूर्ते ।
कूटस्थनित्य निखिलागमगीतकीर्ते देवासुरार्चित विभो तव सुप्रभातम् ॥१२॥

श्रीविश्वनाथकरुणामृतपूर्णसिन्धो शीतांशुखण्डसमलंकृतभव्यचूड ।
भस्माङ्गरागपरिशोभितसर्वदेह वाराणसीपुरपते तव सुप्रभातम् ॥१३॥

देवादिदेव त्रिपुरान्तक दिव्यभाव गङ्गाधर प्रमथवन्दित सुन्दराङ्ग ।
नागेन्द्रहार नतभक्तभयापहार वाराणसीपुरपते तव सुप्रभातम् ॥१४॥

वेदान्तशास्त्रविशदीकृतदिव्यमूर्ते प्रत्यूषकालमुनिपुङ्गवगीतकीर्ते ।
त्वय्यर्पितार्जितसमस्तसुरक्षणस्य वाराणसीपुरपते तव सुप्रभातम् ॥१५॥

कैलासवासमुनिसेवितपादपद्म गङ्गाजलौघपरिषिक्तजटाकलाप ।
वाचामगोचरविभो जटिलत्रिनेत्र वाराणसीपुरपते तव सुप्रभातम् ॥१६॥

श्रीपार्वतीहृदयवल्लभ पञ्चवक्त्र श्रीनीलकण्ठ नृकपालकलापमाल ।
श्रीविश्वनाथमृदुपंकजमंजुपाद श्रीकाशिकापुरपते तव सुप्रभातम् ॥१७॥

काशी त्रितापहरणी शिवसद्मभूता शर्मेश्वरी त्रिजगतां सुपुरीषु हृद्या ।
विद्याकलासु नवकौशलदानशीला श्रीकाशिकापुरपते तव सुप्रभातम् ॥१८॥

श्रीविश्वनाथ तव पादयुगं स्मरामि गङ्गामघापहरणीं शिरशा नमामि ।
वाचं तवैव यशसाऽनघ भूषयामि  वाराणसीपुरपते तव सुप्रभातम् ॥१९॥

नारीनतेश्वरयुतं निजचारुरूपं स्त्रीगौरवं जगति वर्धयितुं तनोषि ।
गङ्गां हि धारयसि मूर्ध्नि तथैव देव वाराणसीपुरपते तव सुप्रभातम् ॥२०॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

ॐ मङ्गलं भगवान् शम्भो मङ्गलम् वृषभध्वज ।
मङ्गलं पार्वतीनाथ मङ्गलं भक्तवत्सल ॥

। एतत् श्लोकद्वयं प्राचीनकविकृतम् ।

Encoded by Subramanian Ganesh sgesh@hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated November 29, 2000